International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 226-229
© 2021 IJSR
www.anantaajournal.com
Received: 13-05-2021
Accepted: 18-06-2021

**Dr. Biswajit Pramanik**
Kharuberia, Howarah, West Bengal, India

**Corresponding Author:**
**Dr. Biswajit Pramanik**
Kharuberia, Howarah, West Bengal, India

# सरलमानकसंस्कृतम् उत प्रौढमानकसंस्कृतम्

## Dr. Biswajit Pramanik

**सारांशः-**
भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा। समग्रजगतितलेऽस्मिन् बह्व्यः भाषाः वर्तन्ते। आसु भाषासु प्रसिद्धभाषात्वेन सर्वभारतीयभाषाजननीत्वेन संस्कृतभाषा विश्वेऽस्मिन् प्रथते। अन्यभाषेव संस्कृताख्यभाषायाः अपि स्वरूपद्वयं भवति सरलं प्रौढञ्च। सरलभाषया लोकव्यवहारः क्रियते। जनाः परस्परं भावाभिव्यक्तिकाले सरलभाषायाः प्रयोगं कुर्वन्ति। संस्कृतभाषायाः इदं सरलरूपम् उररीकृत्य सरलमानकसंस्कृतमित्यस्य संरचना अभूत्। भाषायाः अपररूपं प्रौढमिति। इदं प्रौढरूपं प्रत्येकं भाषायाः साहित्येषु समुपलभ्यते। विद्वज्जनसमूहे अपि प्रौढभाषा प्रयुज्यते। भाषायाः प्रौढस्वरूपम् उररीकृत्य प्रौढमानकसंस्कृतमिति भवितुम् अर्हति। सम्प्रति सरलमानकसंस्कृतेन सह प्रौढमानकसंस्कृतस्य आवश्यकता वर्तते वेति महान् प्रश्नः। सामान्यसम्भाषणकाले सरलसंस्कृतस्यैव आश्रयः श्रेयसे, किन्तु प्राचीनग्रन्थादीनाम् अध्ययनाय सरलसंस्कृतभाषया सह नूनं प्रौढसंस्कृतभाषायाः पर्याप्तं ज्ञानं प्रत्येकमपि संस्कृताध्येतुः भवेत्। सरलसंस्कृतस्य अभ्यासः अधुना प्रायशः सर्वत्रापि जायमानः दृश्यते। सम्प्रति समयः आगतः सरलमानकसंस्कृतेन सह प्रौढमानकसंस्कृतस्य अभ्यासाय। सरलसंस्कृतस्य ज्ञानं सम्प्राप्तवान् सर्वोऽपि संस्कृताध्येता प्रौढसंस्कृतज्ञानाय प्रयतेत। सरलमानकसंस्कृतवत् प्रौढसंस्कृतमपि प्रौढमानकसंस्कृतं भवतु इति धिया तत्रापि सीमाङ्कनं करणीयम्। सर्वकवीनां रचनाशैलीः परिशील्य प्रौढमानकसंस्कृतस्य परिधिनिश्चयः कर्तुं शक्येत। मनुष्यबुद्धौ संस्कृतभाषाप्रयोगसन्दर्भे प्रकोष्ठद्वयं भवेत्। यस्मिन् समये यस्याः भाषायाः प्रयोगः आवश्यकः, तस्मिन् समये तादृशभाषायाः अर्थात् सरलप्रौढयोः आवश्यकतानुगुणं प्रयोगः करणीयः। नवसंस्कृताध्येतृभिः सह निश्चप्रचं सरलसंस्कृतेन, संस्कृतभाषाविद्भिः सह निश्चप्रचम् आवश्यकतानुगुणं सरलेन वा प्रौढेन वा व्यवहारः योग्यतरः। एवं साम्प्रतिके काले सरलमानकसंस्कृतेन सह प्रौढमानकसंस्कृतस्य आवश्यकता वर्तते इति निश्चित्य योग्यस्वरूपनिर्माणं सम्प्रति अस्मदग्रिमोत्तरदायित्त्वम्।

**कूट शब्दः** सरलमानकसंस्कृतम्, संस्कृतभाषा, सरलभाषया लोकव्यवहारः

## प्रस्तावना

> ‘वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते’ [1]

पृथिव्यां बहवः जीवाः सन्ति। प्रत्येकं जीवानां मनसि विभिन्नाः भावाः जायन्ते। मनसि स्थितभावानां प्रकटनं शब्दानां माध्यमेन क्रियते। जीवानां शब्दाभिव्यक्तेः तारतम्यदृष्ट्या मानवः श्रेष्ठः। मानवानां श्रेष्ठतायाः अन्यतमं प्रधानकारणं भवति भाषा। यथा अन्यभौतिकविषयान् विहाय मनुष्यः ससुखं स्थातुं न शक्नोति, तथैव भाषां विना अपि ससुखं स्थातुं न शक्यते।

## भाषा-

भाष्यते अनया इति भाषा। परस्परभावविनिमयाय योग्या साधनभूता इयमेव। प्रत्येकं मनुष्यस्य जीवने भाषा किञ्चन प्रधानम् अत्यावश्यकम् अङ्गभूतं भवति। मानवाः भाषाधारेण तद्भावान् स्पष्टतया अन्येभ्यः सूचयन्ति। अतः भाषा नितराम् अपेक्ष्यते। आङ्ग्लभाषायां भाषावाचकं “Language” इति पदम् Lingua इति शब्दादुद्भूतम्। मानवीयविचाराणां बौद्धिकाभिव्यक्तिरेव भाषा। संस्कृतव्याकरणानुसारेण भाषाशब्दो “भाष् व्यक्तायां वाचि” इत्यस्माद्धातोः “गुरोश्च हलः” इति ‘अ’ प्रत्यये स्त्रियां टापि इति कृते सति निष्पद्यते। ध्वनिरूपमेव भाषायाः वास्तविकं रूपम्। लिखितरूपं तु ध्वनीनां यान्त्रिकविधिमात्रम्। ध्वनिः भाषायाः शरीरं चेत् विचारस्तदात्मेति कथ्यते, द्वाविमौ परस्पराश्रितौ। यथोक्तं कविकुलगुरुकालिदासेन –

> “वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
> जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।” [2]

---

[1] **भर्तृहरिनीतिशतकम्**

[2] **रघुवंशम्** 1-1

**संस्कृतभाषा-**

जगति विद्यमानासु बह्वीषु भाषासु संस्कृतभाषा विशिष्टा वर्तते। संस्कृतभाषायाः महत्त्वं सर्वैरपि अङ्गीक्रियते। सुष्ठु कृतमिति संस्कृतम्। अन्यभाषा इव संस्कृतमपि काचिद् भाषा। सर्वप्राचीनग्रन्थेषु अन्यतमग्रन्थः वेदः संस्कृतभाषया एव विरचितः। न केवलं वेदः अपितु उपनिषदः, पुराणानि, धर्मग्रन्थाः इत्यादयः संस्कृतभाषया एव विरचिताः सन्ति। विश्वेऽस्मिन् विद्यमानव्याकरणग्रन्थेषु अष्टाध्यायी इति सर्वोत्कृष्टग्रन्थः भगवता पाणिनिना संस्कृतभाषया एव विरचितः। प्राचीनानि आध्यात्मिकानि तत्त्वानि संस्कृतभाषया एव ऋषिकविभिः सम्पादितानि। अधुनातनकाले बहुचर्चितः वैद्यशास्त्रे प्रसिद्धः आयुर्वेदः अपि संस्कृतभाषया सम्पुष्टः। अनया एव संस्कृतभाषया प्राचीनकालात् जनाः परस्परं व्यवहारं कुर्वन्ति स्म। मध्येकालं विविधकारणैः संस्कृतभाषाव्यवहारस्य गतिः सत्यमेव न्यूना सञ्जाता स्यान्नाम, किन्तु अधुना पुनरपि जनानां मुखारविन्देषु सा संस्कृतभाषा विलसति। संस्कृतभाषाप्रयोगप्रसङ्गे महर्षिणा पतञ्जलिना उक्तमस्ति यत्-

> यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
> सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ।।[3]

अन्यभाषेव संस्कृतभाषायाः अपि स्वरूपद्वयं भवति- सरलं प्रौढञ्चेति। सरलसंस्कृतं यथा संस्कृतभाषायाः आदिशिक्षायै योग्यं भवति, तथैव भाषाज्ञानस्य गभीरज्ञानं प्राप्तुमपि प्रौढसंस्कृतम् उपयुक्तं भवति। एतयोः आवश्यकता स्वरूपम् इत्यादि क्रमशः अधोऽधः वर्ण्यते-

**सरलमानकसंस्कृतम्** (Simple Standard Sanskrit)

लोकव्यवहारानुगुणं सर्वा अपि भाषा सरला भवति। सरलतमा भाषा प्रयोक्तव्या इत्यस्ति भाषासिद्धान्तः। यथा प्रत्येकमपि जनः भाषाम् अधिगन्तुं शक्नुयुः तथा लोकव्यवहारे परस्परं सम्भाषणकाले जनैः सरलसंस्कृतस्य आश्रयः स्वीक्रियते। आबालवृद्धवनिताः संस्कृतभाषाभ्यासस्य प्राक्काले अपि सरलसंस्कृतस्य अभ्यासं कुर्वन्ति। सरलसंस्कृतप्रयोगेण मनोगतभावाः अतिसहजतया व्यक्तीकर्तुं शक्यन्ते, संस्कृतभाषा अवगन्तुम् अपि शक्यते। किन्तु अस्माभिः प्रयुज्यमाना भाषा सरला अस्ति, उत न इत्यत्र निर्णायकः अंशः कः इति प्रश्नः उदेति।

सरलं संस्कृतम् आवश्यकम् इति कथनेन आ बहोः कालात् संस्कृतं कठिनमिति भावः जनमानसे वर्तते। एतं भावं परिवर्तयितुं संस्कृतं सरलमिति भावजागरणम् अत्यावश्यकम्। संस्कृताध्ययनार्थम् अवसरं ये न प्राप्तवन्तः ते यदि सरलसंस्कृतेन संस्कृताध्ययनस्य अवसरं प्राप्नुवन्ति तर्हि अवश्यं ते सहजतया संस्कृतभाषाध्ययनं कर्तुं शक्नुवन्ति। संस्कृतक्षेत्रे असंख्याकाः संस्कृताभिमानिनः यदि संस्कृताभ्यासकालस्य आदिस्तरे सरलसंस्कृतस्य परिचयं प्राप्नुवन्ति, तर्हि संस्कृतस्य विषये रुचिः निश्चयेन तेषां वर्धिष्यते। सरलसंस्कृतप्रचारद्वारा यदि प्राशासनिकक्षेत्रम्, उद्यमक्षेत्रम्, वाणिज्यक्षेत्रम्, विज्ञानक्षेत्रम्, राजनीतिकक्षेत्रम् इत्यादिषु क्षेत्रेषु सरलसंस्कृतस्य व्यवहारः क्रियते तर्हि संस्कृतभाषायाः आनुकूल्यं तिष्ठति।

मानकं संस्कृतम् इति कथनेन वैयाकरणस्य पाणिनेः परिधौ ये शब्दाः वर्तन्ते ते शब्दाः व्यवहारकाले प्रयोक्तव्याः इति सूच्यते। पाणिनीयपद्धत्या सम्मतमेव मानकमिति चिन्तनीयम्। एतत् मानकं संस्कृतं यथाशक्ति अखिलभारतस्तरे समानरीत्या प्रचलेत्। कस्यचित् अपि वस्तुनः बहूनि नामानि भवन्ति। एवं बहुषु नामसु सत्सु प्रामाणिकरीत्या अखिलभारतीयप्रयोगदृष्ट्या लोकप्रियतादृष्ट्या च एकस्य नाम एव स्वीकरणीयं भवति। तत् नाम समग्रे भारते एकमेव अर्थं सूचयेत्। अर्थात् मानकसंस्कृते प्रादेशिकप्रभावः न भविष्यति।

इत्थं लोकव्यवहारः, शिक्षणम्, प्रसारः, पाठ्यपुस्तकनिर्माणम्, संस्कृतभाषानुवादः, साहित्यसमृद्धिः इत्येतेषु सर्वेषु प्रसङ्गेषु यदि वयं सरलं मानकं च आश्रित्य तिष्ठामः तर्हि संस्कृतं पुनरपि स्वस्य सर्वजनभाषास्वरूपम् आश्रित्य सुप्रतिष्ठितं भविष्यति। ऋषिः अरविन्दः, श्रीमाता, वाराणसेयः वासुदेवद्विवेदी, महाराष्ट्रियः भण्डारकरवर्यः, उत्तरप्रदेशीयः श्यामकुमारसिंहवर्यः इत्यादयः सरलसंस्कृतमेव इच्छन्ति स्म।

**किमर्थं सरलमानकसंस्कृतम्?**

सरलमानकसंस्कृतस्य आवश्यकतां मनसि निधाय कानिचन कारणानि इह प्रस्तूयन्ते-

1. लोकव्यवहारं सम्यक्तया कर्तुं सरलमानकसंस्कृतम् आवश्यकम्।
2. कठिनविषयान् सुलभतया अवगमयितुम् आवश्यकं सरलमानकसंस्कृतम्।
3. संस्कृतभाषायाः प्रसारः सर्वत्र भवतु।
4. संस्कृते विद्यमानस्य साहित्यस्य समृद्धिः सर्वत्र भवतु।
5. संस्कृते विद्यमानं ज्ञानं सर्वैरपि अवश्यं प्राप्येत।
6. संस्कृतानुवादसंरचनादृष्ट्या सरलसंस्कृतम् आवश्यकम्।
7. पाठ्यपुस्तकानां निर्माणार्थम् आवश्यकं सरलमानकसंस्कृतम्।
8. शिक्षणे माध्यमं सरलं भवतु इत्येतदर्थम् आवश्यकं सरलमानकसंस्कृतमिति।

**सरलमानकसंस्कृतस्य नियमाः-**

पाणिनिपरिधिं सम्यक् विविच्य सर्वभारतग्राह्यत्वं स्थिरीकृत्य सरलमानकसंस्कृतस्य केचन नियमाः पाठ्यविषयाः चात्र क्रमशः प्रस्तूयन्ते-

1. अजन्तशब्दप्रयोगः- अकारान्तपुंलिङ्गनपुंसकलिङ्गशब्दाः, आकारान्तस्त्रीलिङ्गशब्दाः, ईकारान्तस्त्रीलिङ्गशब्दाः एव प्रयोक्तव्याः सरलमानकसंस्कृते। केषाञ्चन हलन्तानां शब्दानां स्थाने अजन्तानां शब्दानां प्रयोगः अपि शक्यः। यथा राजन् इति स्थाने महाराजः इति प्रयोक्तुं शक्यते।
2. पर्यायशब्दप्रयोगे चिन्तनम्- संस्कृते एकस्य शब्दस्य स्थाने बहुविधपर्यायवाचिशब्दानां प्रयोगः क्रियते। तत्र कस्यचित् प्रसिद्धस्य एकस्य शब्दस्य प्रयोगः करणीयः। जलमुक्, जलदः, वारिधः, अम्बभृत् इत्यर्थे मेघः इति शब्दः प्रयोक्तव्यः।
3. युष्मदर्थे भवच्छब्दप्रयोगः- मध्यमपुरुषार्थे युष्मद् इति शब्दस्य प्रयोगः संस्कृतशैली वर्तते। अस्मिन् प्रसङ्गे युष्मद् इति शब्दप्रयोगे भवत् इति शब्दस्य प्रयोगः सुतरां शक्यः एव।
4. एकवचन-बहुवचनप्रयोगः- त्रिषु वचनेषु वचनद्वयस्य अर्थात् एकवचनस्य बहुवचनस्य च प्रयोगः कार्यः। द्विवचनप्रसङ्गः कौशलेन सम्पादनीयः यथा बालकौ गच्छतः इति स्थाने बालकद्वयं गच्छति इति प्रयोक्तव्यम्।
5. विभक्तिविषये सारल्यम्- कासाञ्चन विभक्तीनां स्थाने अव्ययं प्रयोक्तव्यम्, यथा- पञ्चमीविभक्तौ तसिल् इति प्रत्ययस्य प्रयोगः।
6. भूतकालार्थे कृदन्तप्रयोगाः- संस्कृते भूतकालार्थे लङ्लकारप्रयोगः क्रियते। सरलमानकसंस्कृते क्तवतु-प्रत्ययस्य प्रयोगः करणीयः।
7. चत्वारः एव लकाराः- दशानां लकाराणां स्थाने चतुर्णामेव लकाराणां प्रयोगः शक्यः अस्मिन् स्तरे। ते लकाराः यथा- वर्तमानकालार्थे लट्, प्रार्थनार्थे लोट्, भविष्यदर्थे लृट् पुनश्च विधिप्रभृत्यर्थे विधिलिङ् इत्यादि।
8. चितधातूनां प्रयोगः- विद्यमानेषु द्विसहस्रे धातुषु चितानां केषाञ्चन धातूनामेव प्रयोगः स्यात् प्राथमिकस्तरे। भ्वादिगणीयाः, दिवादिगणीयाः, तुदादिगणीयाः, चुरादिगणीयाः प्रायशः चत्वारिंशत् धातवः पर्याप्ताः प्राथमिकस्तरे संस्कृताभ्यासाय। प्रगतस्तरे आत्मनेपदिधातूनां प्रयोगः भवितुम् अर्हति। आवश्यकतायां सत्यां विभज्यप्रयोगस्य आश्रयः अपि स्वीकरणीयः भवेत्।
9. लघुवाक्यप्रयोगः- यावत् शक्यं स्तरेऽस्मिन् लघूनां वाक्यानामेव अभ्यासः स्यात्।
10. सन्धिव्यवस्था- सन्धिः विवक्षाधीनः वर्तते इति कारणात् प्राथमिके स्तरे सन्धिः न कार्यः। नास्ति, तथापि, तत्रैव इत्यादिषु स्थलेषु अनुकरणात्मकप्रयोगः उचितः।
11. कर्तरिप्रयोगाधिक्यम्- त्रिविधेषु प्रयोगेषु कर्तरिप्रयोगः एव आरम्भदशायाम् औचित्यं वहति। कर्तरिप्रयोगः वाक्ये सरलतां जनयति।
12. अन्वयानुसारिवाक्यप्रयोगः- आदौ कर्तृपदम्, तस्मात् कर्मपदं तदनु क्रियापदम् इति क्रमः प्रायः सर्वास्वपि भारतीयभाषासु वर्तते। आरम्भे अयमेव क्रमः वाक्यसरलतां सूचयति। अन्वयानुसारेण एव पदानां प्रयोगे अर्थावगमः स्फुटः भवेत्।
13. सामान्यसमासानां प्रयोगः- अप्रयत्नेन यथा समासः स्यात् तत्रैव समासः प्रयोक्तव्यः। अन्यस्थलेषु समस्तपदानां प्रयोगाः न भवेयुः।

[3] महाभाष्यम्, पस्पसाह्निकम्।

**सरलमानकसंस्कृतस्य प्रयोगः कुत्र करणीयः?**

1. भाषितॄणां जनानां मध्ये।
2. शिक्षण-प्रशासन-मनोरञ्जन-सम्पर्क-विज्ञान-वाणिज्य-सूचनादीनां माध्यमरूपेण।
3. अनुवादावसरे (इतरभाषातः संस्कृतं प्रति)
4. संस्कृतेन एव समकालिकसाहित्यस्य निर्माणावसरे
5. शब्दनिर्माणस्य निरन्तरतावसरे

**प्रौढमानकसंस्कृतम्- (High Standard Sanskrit)**

प्रौढम् अर्थात् High, मानकम् अर्थात् Standard, संस्कृतम् अर्थात् Sanskrit प्रौढमानकसंस्कृतं नाम संस्कृतभाषायाः यस्मिन् स्तरे भाषायाः उन्नयनं यत्र क्रियते। या भाषा सामान्यतया व्यवह्रियते तस्याः भाषायाः यत् साहित्यिकं स्वरूपं व्यवह्रियते तत् प्रौढमानकसंस्कृतम् इत्युच्यते।

प्रौढम् अर्थात् उन्नतस्तरीयम् इति। भाषा द्विविधा भवति इत्युक्तम्। सरलं प्रौढञ्चेति। भाषायाः प्रौढस्वरूपं काव्येषु साहित्येषु शास्त्रेषु च तिष्ठति। अतः प्रौढम् इति कथनेन शास्त्रीयम्, साहित्यिकम्, काव्यिकम् उन्नतस्तरीयं वा इति कथयितुं वयं शक्नुमः। सरलभाषाशैलीतः सा प्रौढभाषाशैली नितरां भिद्यते। प्रौढभाषास्तरे शब्दप्रयोगाः विविधप्रकारकाः भवन्ति। तत्र भाषाशैल्याः विविधमुख्यानि दृग्गोचराणि भवन्ति। प्रौढमिति कथनेन कठिनमिति भावः सर्वथा नाङ्गीक्रियते। प्रौढमिति कथनेन काव्यिकमिति कथनम् अभिप्रेतम् अस्ति। अर्थात् विविधकाव्येषु कविभिः ये प्रयोगाः दर्शिताः, ये प्रयोगाः कृताः ते प्रयोगाः एव प्रौढपदवाच्याः सन्ति।

मानकं संस्कृतम् इति कथनेन सामान्यतया वैयाकरणस्य पाणिनेः नियमान् अनुसृत्य कविभिः ये प्रयोगाः कृताः, तेषां शब्दानाम् अङ्गीकरणं मानकमिति कथ्यते। एतत् मानकं संस्कृतं यथाशक्ति अखिलभारतस्तरे समानरीत्या प्रचलेत्। कस्यचित् विषये विद्यमानेषु बहुषु शब्देषु सत्सु प्रामाणिकरीत्या अखिलभारतीयप्रयोगदृष्ट्या लोकप्रियतादृष्ट्या रुचिरप्रयोगदृष्ट्या च एकस्य एव शब्दस्य स्वीकरणं मानकमिति उच्यते।

प्रौढमानकसंस्कृतम् इति कथनेन काव्येषु कविभिः ये शब्दाः प्रयुक्ताः ते शब्दाः गृहीताः भवन्ति। स्वाभाविकतया इमे शब्दाः श्रवणमाधुर्यं जनयन्ति। भाषास्तरविकाशाय प्रयोक्त्रा उक्तः शब्दः यथा प्रौढः अपि स्यात् पुनश्च सर्वग्राह्यः अपि स्यात् तथा प्रयोक्तव्यम्। प्रौढमानकसंस्कृतभाषायाः अभ्यासाय काव्यादीनाम् अध्ययनादिकं कर्तव्यम्। तेन वयं तां प्रौढशैलीम् अधिगन्तुं शक्नुयाम।

**किमर्थं प्रौढमानकसंस्कृतम्?**

1. संस्कृतभाषायाः स्तरः यः वर्तते तस्य संवर्धनार्थं प्रौढमानकसंस्कृतम् आवश्यकम्।
2. अर्जितज्ञानस्य स्तरः इतोऽपि उन्नतः भवतु इत्येतदर्थं प्रौढमानकसंस्कृतम् आवश्यकम्।
3. संस्कृतभाषायां विद्यमानानां प्रौढग्रन्थानाम् अवगमनम्, अध्ययनं च स्वयं कर्तुम् आवश्यकं सामर्थ्यं प्राप्तुं प्रौढमानकसंस्कृतमावश्यकम्।
4. संस्कृते विद्यमानस्य गभीरसाहित्यस्य समृद्ध्यर्थम्।
5. संस्कृते समुचितं ज्ञानं प्राप्य तदनु स्वीयप्रतिभायाः संवर्धनार्थं प्रौढमानकसंस्कृतम् आवश्यकम्।
6. प्रौढस्तरे अनुवादं कर्तुमपि प्रौढसंस्कृतम् आवश्यकम्।
7. शास्त्रीयपाठ्यपुस्तकेषु प्रतिपादितान् विचारान् सम्यक्तया ज्ञातुमावश्यकम्।
8. पारम्परिकशिक्षणस्य माध्यमं प्रौढं भवतु इत्येतदर्थम् आवश्यकम्।
9. शास्त्रीयगोष्ठीषु सभासु स्वीयभाषासामर्थ्यस्य समुपस्थापनार्थं प्रौढमानकसंस्कृतम् आवश्यकम्।

**प्रौढमानकसंस्कृतविषयाः**

प्रौढमानकप्रयोगाः काव्याध्ययनादेव ज्ञायन्ते । काव्येषु कविभिः प्रयुक्ताः शब्दाः विभिन्नप्रकारकाः भवन्ति । व्याकरणदृष्ट्या ते शब्दाः विविधाः भवन्ति । अतः कीदृशान् शब्दान् वयं पठामश्चेत् अस्माकं भाषानैपुण्यं भवेदिति महान् कश्चन प्रश्नविशेषः अस्ति । तदर्थम् अस्ति कश्चित् उपायविशेषोऽपि । अधोलिखिताः विषयाः विशेषतया अभ्यस्यन्ते चेत् भाषासामर्थ्यस्य विकासः भवितुम् अर्हति । इमे बिन्दवः क्रमशः अधोऽधः समुपवर्ण्यन्ते-

क. विभक्तिज्ञानम्- आदावेव अजन्तहलन्तशब्दानां विभक्तिज्ञानम् अस्माभिः प्राप्तव्यम् । का विभक्तिः किमर्था भवतीति विषये ज्ञानं तन्नाम कारकविषये स्पष्टधारणा अस्माकं भवेत् । पुनश्च त्रिषु लिङ्गेषु सप्तसु विभक्तिषु समेऽपि अजन्तहलन्तशब्दाः ज्ञातव्याः। आवश्यकतायां सत्यां प्रतिनिधिभूतशब्दानां पारायणमपि कार्यम् । काव्येषु विविधप्रकारकाः अजन्तहलन्तशब्दाः भवन्ति। सधैर्यम् अभ्यासं विधाय सप्रयोगं ते शब्दाः स्मर्तव्याः। इह सर्वनामशब्दाः अपि अन्तर्भवन्ति ।

ख. एकवचन-द्विवचन-बहुवचनप्रयोगः- सरलमानकसंस्कृतप्रसङ्गे एकवचनस्य बहुवचनस्य च प्रयोगः आसीत्। किन्तु अत्र त्रयाणां वचनानाम् अर्थात् विशिष्ट द्विवचनस्यापि प्रयोगः करणीयः।

ग. विभिन्नकृदन्तप्रयोगाणां प्रभावः- संस्कृते ये कृदन्तप्रत्ययान्तप्रयोगाः सम्भवन्ति, तेषां प्रयोगज्ञानमपि आवश्यकम्।

घ. लकारज्ञानम्- सरलसम्भाषणशिबिरे अस्माभिः सामान्यतया लट्, लोट्, लृट् इत्यादयः त्रिचतुराः लकाराः अभ्यस्यन्ते । काव्येषु सर्वेऽपि लकाराः प्रयुज्यन्ते । अतः लकाराभ्यासदृष्ट्या सर्वेषामपि लकाराणां स्पष्टधारणा अस्माकमवश्यं भवेत् । तत्र विशिष्य लङ्, विधिलिङ्, लुङ्, लृङ् इत्यादयः अन्तर्भवन्ति । परस्मैपदधातुभिस्सह आत्मनेपदक्रियापदानामपि प्रयोगज्ञानम् आवश्यकम् ।

ङ. कृदन्तप्रत्ययज्ञानम्- संस्कृतकाव्येषु उत्तमकृदन्तप्रत्ययान्तशब्दाः कविभिः प्रयुक्ताः। तदर्थं सामान्यतया सर्वविधधातूनां क्त्वा, ल्यप्, तुमुन्, कृत्यप्रत्ययाः, शतृ, शानच् इत्यादिप्रत्ययान्तरूपाणि अस्माभिः ज्ञातव्यानि ।

च. तद्धितप्रत्ययज्ञानम्- तद्धितान्तशब्दाः भाषानैपुण्यं सुतरां प्रवर्धयन्ति । तद्धितप्रत्ययाः विविधार्थेषु प्रयुज्यन्ते । विविधार्थेषु प्रयुक्ततद्धितशब्दप्रयोगाः ज्ञातव्याः। तद्धितप्रकरणं किञ्चिदतिविशालमस्ति । तस्मादेव किञ्चित् सधैर्य काव्यिकतद्धितप्रयोगाः परिशीलनीयाः।

छ. अव्ययज्ञानम्- संस्कृतभाषानैपुण्यं संवर्धयन्ति काव्यिकानि अव्ययानि बहूनि वर्तन्ते । इमानि अव्ययानि सप्रयोगं परिशीलनीयानि ।

ज. उपसर्गज्ञानम्- द्वाविंशतिः उपसर्गाः सन्ति । सोपसर्गक्रियापदानि, सोपसर्ग-सुबन्ताश्च काव्येषु परिशीलनीयाः। सोपसर्गक्रियापदानां परिशीलनसमये अस्माभिः लकारदिशा अपि प्रयोगाः परिशीलनीयाः।

झ. प्रयोगज्ञानम्- कर्तरिप्रयोगः, कर्मणि प्रयोगः, भावे प्रयोगः इति प्रयोगः त्रिविधः। संस्कृतवाङ्मये विद्यमानसाहित्ये कर्मणि प्रयोगः विशेषेण शोभते । इमे प्रयोगाः अपि विविधलकारदृष्ट्या परिशीलनीयाः।

ञ. समासज्ञानम्- समसनं समासः। समासबहुलं भवति काव्यम् । सामान्यतया काव्ये विद्यमानाः विशेषसमासान्तप्रयोगाः अस्माभिः परिशीलनीयाः।

ट. सन्धिज्ञानम्- संस्कृतसाहित्यं सन्धिबहुलमपि वर्तते । अतः संस्कृतभाषा-नैपुण्यदृष्ट्या काव्येषु प्रयुक्तानि सन्ध्युदाहरणानि सप्रयोगं परिशीलनीयानि ।

ठ. विशेषधातुप्रयोगः- प्रौढमानकसंस्कृते विशेषधातूनां प्रयोगे सामर्थ्यं प्राप्तव्यम्।

ड. अन्यविषयज्ञानम्- एतान् प्रमुखान् अंशान् विहाय अन्ये केचन बिन्दवः सन्ति, येषां प्रयोगः काव्येषु जायते । ते प्रयोगाः अपि अस्माभिः अवश्यं ज्ञातव्याः। सर्वैः सह एतेषां प्रयोगज्ञानमपि समुपार्जयेम । इमे विषयाः यथा- संख्यासु लिङ्गभेदः, पूरणप्रत्ययान्तशब्दाः, नित्यबहुवचनान्तशब्दाः, स्त्रीलिङ्गप्रकरणम्, द्विरुक्तिप्रकरणम्, सनाद्यन्ताः, विशेषप्रयोगाश्च । एतान् अंशान् विहाय अन्येऽपि विषयाः निश्चयेन काव्येषु रमन्ते । ते प्रयोगाः अपि यथामति स्मर्तव्याः प्रयोक्तव्याश्च ।

**प्रौढमानकसंस्कृतस्य प्रयोगः कुत्र करणीयः?**

**क्रियान्वयनाय क्षेत्राणि-**

1. संस्कृते विशेषज्ञानं येषां वर्तते तादृशजनानां मध्ये प्रयोगः करणीयः।
2. शिक्षणस्तरस्य औन्नत्यं सम्पादयितुं यत्र अवकाशाः वर्तन्ते तत्र प्रयोगः करणीयः।
3. प्रौढग्रन्थानाम् अनुवादावसरे।

4. संस्कृतेन एव समकालिकसाहित्यस्य निर्माणावसरे संस्कृतस्य औन्नत्यम् अभिव्यक्तीकर्तुम्।
5. प्रसिद्धैः शब्दैः भाषणसन्दर्भे अथवा लेखनसन्दर्भे।

**उपसंहारः**

प्रत्येकमपि भाषाशिक्षणस्य आरम्भकाले सरलभाषायाः आश्रयः एव करणीयः। अतः तद्दृष्ट्या सरलसंस्कृतस्य शिक्षणं प्राप्तव्यम्। इदं सरलसंस्कृतं मानकं स्यादिति धिया सरलमानकसंस्कृतस्य आनयनं कृतमस्ति। मतधर्मजातिनिर्विशेषेण संस्कृताध्यापनकाले आदौ अयमेव सर्वोत्कृष्टमार्गः। नान्य पन्थाः विद्यते एतं विहाय। सरलनामकसंस्कृतस्य कार्यान्वयनाय पूर्वसूचिताः समे अपि मार्गाः आश्रयणीयाः सन्ति। परन्तु संस्कृतभाषाशिक्षणे सरलसंस्कृतशिक्षणमेव अन्तिममार्गः नास्ति। संस्कृतभाषान्दोलनस्य लक्ष्यं भाषातः शास्त्रं प्रति गमनमिति। संस्कृतशास्त्रेषु यानि तत्त्वानि निहितानि सन्ति, तेषां तत्त्वानाम् उद्धरणमेव संस्कृतशिक्षणस्य अन्तिमोद्देश्यम्। संस्कृतं संस्कृतेन इति प्रतिपादयितुम् आरम्भस्तरे सरलसंस्कृतस्य परिचयः कार्यते। संस्कृतशिक्षणस्य यत् उद्देश्यं वर्तते, तदुद्देश्यं प्रतिपादयितुमपि सरलमानकसंस्कृतस्य आवश्यकता वर्तते। संस्कृतभाषाप्रयोगकाले यथा निर्गतवान् इति प्रयोगः दृश्यते, तथैव निरगच्छत् इति प्रयोगः अपि दृश्यते। सः बालकः निर्गतवान् इतीत्थं प्रयुञ्जानः कोऽपि अध्येता यथा काले काले स्वयम् अधीत्य अग्रे भविष्ये सः बालकः निरगच्छत् इतीत्थं प्रयोगमपि करिष्यति। सरलमानकसंस्कृतकथनेन काव्यिकप्रयोगाः न करणीयाः इति विरोधः नास्ति।

भाषाशिक्षणसन्दर्भे ज्ञातात् अज्ञातं प्रति, सरलात् कठिनं प्रति, अंशात् पूर्णं प्रति इत्यादीनि कानिचन शिक्षणसूत्राणि इदमेव प्रमाणयन्ति यत् भाषायाः ज्ञातांशः, सरलांशः, अंशभूतांशः इत्यादयः भवन्ति, तथैव अज्ञातांशः, कठिनांशः, पूर्णांशः इत्यादयः अंशाः अपि भवन्ति। ज्ञातांशादयः भाषायाः सरलरूपं प्रतिपादयन्ति, पुनश्च अज्ञातांशादयः भाषायाः सरलात् भिन्नं रूपं प्रतिपादयन्ति। यत् रूपं प्रौढम्, शास्त्रीयम्, काव्यिकम् इत्यादिकं कथयितुं शक्यते। तस्मादेव प्रौढमानकसंस्कृतम् इत्यस्य धारणा अभूत्। यत् प्रौढरूपं काव्यिकरूपं वा भाषायाः उद्दिष्टं तत् रूपं काव्येषु एव कविभिः प्रदर्शितं वर्तते। तत् काव्यिकरूपमेव प्रौढरूपत्वेन उच्यते। अतः भाषास्तरदृष्ट्या द्विधा प्रयोगः शक्यः। प्रो. प्रह्लादजोशिवर्याः वदन्ति यत्- संस्कृताध्येतॄणां मस्तिष्कं संस्कृतभाषाप्रयोगदृष्ट्या द्विधा विकसितं स्यात्। यत्र सरलभाषाप्रयोगस्य आवश्यकता वर्तते तत्र सरलसंस्कृतस्य प्रयोगः कार्यः, पुनश्च यत्र किञ्चित् काव्यिकप्रयोगाणाम् अर्थात् प्रौढसंस्कृतस्य आवश्यकता वर्तते तत्र प्रौढसंस्कृतस्य प्रयोगः करणीयः। एवम् आवश्यकतानुगुणं सम्प्रति संस्कृतक्षेत्रे संस्कृतभाषाशिक्षणस्य उभयविधरूपस्य अर्थात् सरलमानकस्य प्रौढमानकस्य च महती अपेक्षा वर्तते।

**ग्रन्थसूची-**

1. मूर्तिः गुल्लपल्लि श्रीरामकृष्ण, (2004), काव्येषु प्रायोगिकं व्याकरणम्, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्
2. हेगडे जनार्दन, (2012), भाषापाकः, बेङ्गलूरु, संस्कृतभारती
3. हेगडे जनार्दन, (2016), अभ्यासदर्शिनी, बेङ्गलूरु, संस्कृतभारती
4. हेगडे जनार्दन, (2019), अभ्यासनिधिः, बेङ्गलूरु, संस्कृतभारती
5. Rashtriya Sanskrit Sansthan (2016), Simple Standard Sanskrit (SSS), नवदेहली